डोळ्यांतलें कुसळ दिसतें पण आपल्या डोळ्यांतलें मुसळ दिसत नाहीं"; "लोकां सांगे ब्रह्मज्ञान आपण कोरडे पाषाण!" ( यत् परं शिक्षयस्येवं न स्वं शिक्षयसि स्वयम् । )

**पाटच्चरलुण्ठिते वेश्मनि यामिकजागरणम्** The vigilance of the watchman after the house has been plundered by thieves. This is equivalent to the English proverb, "Shutting the stable door after the horse is gone".

**पाठक्रमन्यायः** Vide Dictionary p. 1003.

**पित्तं यदि शर्करया शाम्यति कोऽर्थः पटोलेन** If bile is counteracted [ pacified ] by sugar what is the use of a species of [ bitter ] cucumber [ used as medicine ]. It is used to illustrate the futility of strenuous efforts to succeed in an undertaking which requires little effort. सामसाध्येषु कार्येषु यो दण्डं योजयेद् बुधः। स पित्ते शर्कराशाम्ये पटोलं कटुकं पिबेत् । Pt. 3. 132.

**पिपीलिकागतिन्यायः** The maxim of the speed of ants. "Slow and steady wins the race." यथा पिपीलिका वृक्षशिरःस्थितमधुरफलरसास्वादने झटित्यशक्ता सत्यपि बह्वायासेन गच्छन्ती कालान्तरे तद्रसमवश्यमास्वादते, तथैवाज्ञानी पुरुषः श्रुतिस्मृतिपुराणविहितकर्मोपासनादिमार्गसंजातशुद्धान्तःकरणतया जन्मान्तरेषु कदाचित् प्राप्तपूर्णज्ञानोऽवश्यं ब्रह्मानन्दमनुभवतीति । लौ. न्याय.; योजनानां शतं गच्छेच्छनैर्यान्ती पिपीलिका। अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति॥

**पिष्टपेषणन्यायः** The maxim of grinding flour or meal, used to denote a superfluous or unprofitable exertion like the attempt of a man to grind pounded flour. cf. न हि स्निग्धस्य स्नेहनं शक्यं कर्तुं पिष्टस्य वा पेषणम् । ŚB. on MS. 9. 2. 3; यदि तावच्छ्रुतस्यार्थस्य प्रश्नः कृतस्ततः पिष्टपेषणवत् पुनरुक्तोऽनर्थकः प्रश्नः स्यात्। Śaṁkara on Ken. 32; तुषकण्डनन्याय and कृतस्य करणं वृथा ।

**पुष्टलगुडन्यायः** The simile of a stout cudgel. Such a stick hurled at a yelping cur, may at the same time strike and silence other dogs near it; and so the nyāya seems to be used somewhat in the sense of "killing two birds with one stone." एकतान्त्रिकमतनिरासाय प्रयुक्तया युक्त्या तत्सदृशमतान्तरनिराकरणं यदा विवक्ष्यते तदा पुष्टलगुडन्यायप्रवृत्तिः । रघुनाथ. The maxim is akin to प्रधानमल्लनिबर्हणन्याय.

**पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः** Special rules are taken into consideration first and afterwards general rules. See Mbh. 2. 4. 83; 3. 1. 3; 3. 2. 124 etc.

**प्रत्यक्षे किमनुमानम्** Where there is direct sense perception, what need is there of inference? It is a well-known principle. cf. वेदवाक्यानुमानं हि तावदेव प्रवर्तते । तदर्थविषयं यावत् प्रत्यक्षं नोपलभ्यते ॥; प्रत्यक्षे श्रूयमाणे तु न विधेतानुमानिकम् । न हि हस्तिनि दृष्टेऽपि तत्पदेनानुमीयते ॥ तंत्र. 1. 3. 2-3; प्रत्यक्षमनुमानाद्बलीयः । ŚB. on MS. 3. 1. 12.

**प्रधानमल्लनिबर्हणन्यायः** The maxim of the destruction of the chief antagonist. It illustrates the principle that when the most formidable enemy has been defeated, the less formidable are already virtually overcome. अतः प्रधानमल्लनिबर्हणन्यायेनातिदिशति । एतेन प्रधानकारणवादप्रतिषेधन्यायकलापेन सर्वेऽण्वादिकारणवादा अपि प्रतिषिद्धतया व्याख्याता वेदितव्याः । Ś. B. on Br. Sūt. 1. 4. 28.

**प्रपानकरसन्यायः** The simile of a kind of drink (sherbet). It is used to illustrate the production of some new thing by the union of others, just as sherbet is the result of the commingling of various ingredients. प्रतीयमानः प्रथमं प्रत्येकं हेतुरुच्यते । ततः संवलितः सर्वो विभावादिः सचेतसाम्। प्रपानकरसन्यायाच्चर्व्यमाणो रसो भवेत्। यथा खण्डमरीच्यादीनां संमेलनादपूर्व इव कश्चिदास्वादः प्रपानकरसे संजायते विभावादिसंमेलनादिहापि तथेत्यर्थः । S. D. This is meant to show how the flavour is single, though spoken of as resulting from a composition of causes.

**प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते** ( श्लोकवार्तिक )—Even a stupid person does not adopt a course of action without a motive.

**प्रस्तरप्रहरणन्यायः** Vide Dictionary p. 1119.

**फलवत्संनिधावफलं तदङ्गम्** (ŚB. on MS. 4. 4. 19) The principle that whatever has no result of its own, but is mentioned in connection with something else which has such a result, is subordinate to the latter. cf. Ś. B. on Br. Sūt. 2. 1. 14.

**बधिरकर्णजपन्यायः** The illustration of whispering in the ear of a deaf man. See अरण्यरोदनन्याय etc.

**बर्हिर्न्यायः** Vide Dictionary p. 1154.

**बहूनामनुग्रहो न्याय्यः** The association of many is good policy. cf. बहूनामप्यसाराणां मेलनं कार्यसाधकम् । तृणैः संपाद्यते रज्जुस्तया नागोऽपि बध्यते ॥ Pt 1. 331.

**बीजवृक्षन्यायः** The maxim of the seed and tree. A tree is an outcome of a seed and the seed is the effect of the tree. It is very difficult to decide which is earlier in time. Each is a cause and effect of the other.

**बीजाङ्कुरन्यायः** The maxim of an eternal series of seed and shoot. As the seed produces the shoot, so the latter in turn reproduces the former. Each therefore is a cause and effect. न च कर्मान्तरेण शरीरं संभवति । न च शरीरमन्तरेण कर्म संभवतीति इतरेतराश्रयत्वप्रसंगः । अनादित्वे तु बीजाङ्कुरन्यायेनोपपत्तेर्न कश्चिद् दोषो भवति । Ś. B. on Br. Sūt. 2. 1. 16; बीजं विना नाङ्कुरो जायते, अङ्कुरं विना च न बीजोत्पत्तिरिति । एवं यत्र परस्परकार्यकारणभावस्तत्रायं न्यायः प्रवर्तते । तथा च बीजजातीयं प्रत्यङ्कुरजातीयम्, अङ्कुरजातीयं प्रति बीजजातीयं कारणम्। अतो बीजाङ्कुरप्रवाहानादितया च यद् बीजं प्रति यदङ्कुरस्य कारणत्वं तदङ्कुरं प्रति तद्बीजस्य न कारणत्वमतो नान्योन्याश्रयः । लौ. न्याय.; cf. the maxim of the same import अण्डकुक्कुटीन्याय.

**बुभुक्षितः किं न करोति पापम्** What sin does a hungry man not do? Hunger leads to any sin, impiety or crime. cf. दरिद्रः किं न कुरुते ।